This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥ कठभाष्यटिप्पणस्येदंपुस्तकं ॥

Acc. No. :- 377 M1054
Title :- कठोपनिषद्भाष्य
Author :- शंकराचार्य
Subject :- वेदांत
पेजे :- 15

KKSU LIBRARY
RAMTEK
441 106
M1054
Dist Nagpur

1

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्वा वावसृतस्तदितियोजनांतरितस्यसन्विशेषोमवति उपाध्यविविक्तदर्शीनस्तादुविशेषएवेत्यर्थः स्यात्तो
विरुद्धधर्मत्वं नास्तीत्येतदेवश्रुतियोजनयादर्शयति॥ ऊरणानामित्यादिना॥ एवंदेहाविशानस्य
तिमनुष्योहनीलंपश्यामीत्यादिपरिछिन्नविशानस्यस्यर्थः॥ नबहुनाश्रुतेनेत्यात्मप्रतिपाद
कोयनिषद्विचारादितिरिक्तःशास्त्रमवेणनलभ्यउपनिषद्विचारेणत्वेकेवलेनेतिसिद्धंपदद्वार
हितेननलभ्यतइत्यर्थः॥ परमेश्वराचार्यानुग्रहेणतुलभ्यतइत्याह॥ यमेवेति॥ यमेवस्वात्मा
नमेववाधकः श्रवणमननादिभिर्दृष्टएतेसमजतेश्रवणादिकालेपिसोहमित्यभेदेनेवानुसं
धत्तइत्यर्थः॥ तेनेतिलक्षणयापरमात्मानुग्रहएववरित्राजमेदानुसंधानवतायथानु
संधानमात्मतयेवपरमात्मालभ्यात्मवतीत्यर्थः॥ वेपरीत्येनवायोजना॥ आत्मानुएषप्र
करणेपरमात्मांतर्यामिरूपेणाचार्यरूपेणोवाव्यवस्थितोयमेवमुमुक्षुणातमजतेऽनुगृह्य
तितेनैवपरमेश्वरानुग्रहीतेनात्मेदानुसंधानवतालभ्यतइत्यर्थः॥ दुश्चरितकायिकपापं
यस्तेनेवंप्रतउक्तसाधनस्यपानोनभवतीत्यकथंवेदेतिसंबंधः अतोनत्वेप्यपर्याप्तइत्य
तेप्यसमर्थः॥ ॥ इतिद्वितीयावल्ली॥ ॥ ॥ २थकःपकःकल्पनेतिप्रसिद्धेरथशब्दो
र्थकल्पनेत्यर्थः॥ अतएवानकर्तृजीवस्यावेदकत्वंस्थितम्॥ सिद्धेद्वितीयान्वेषणयालोके
सदृश्यात्रवेणसमानस्वभावेप्रथमप्रतीतिदर्शनात्तेनतयासमानस्वभावःपरमात्मैव
द्वितीयःप्रतीयतेतस्यचोपचारादितयाऽन्यत्वमित्यर्थः॥ बालपुरुषाकारस्यानंदमयस्य
काराप्रवेशः॥ पूर्वमित्यादि॥ गार्हस्थ्यप्रत्योदक्षिणामिद्राहवनीयः सभ्यस्यावसथ्यइति
एतेयज्ञाग्नयोयेषांतेतथोक्ताः स्त्रुपजेत्यादिवीप्सयापुरुषयोषित्सुपचरन्वग्निहोत्रेकुर्वतेत
बालकस्यानीयइत्यर्थः। यत्रस्वेमहिम्नेसविश्वोपसंहारंकृत्वातिष्ठतेतंकोवेदेतिसंबंधः॥ श्लोक ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निहोत्राधिकारिण एतेवापेक्षामय इत्यर्थः॥ ननु नरसंगतिर्ब्रह्मविद्: पंचाग्निविदश्च सांप्रतमनु
भा पलब्धेत्यादित्यान्वयपूर्वविद्वदनुपपत्तिविरोधमाह॥ यः सेतुः सेतुरिवेत्यादिना॥ पूर्वेषांयथापि
वि ब्रह्मलोकादिसंपत्तिप्रापकत्वात्तिरोधा तथापि नाधिकोपयोगमर्कोपप्रज्ञानांसंसरतीत्यान्वय
चेतनत्वात्स्वाभाविकी सप्तित्वयोग्यतास्तीत्यपि प्रेत्यतासंशयमाह॥ परापरेति॥ तत्रतितयोः इ४
प्रथमगतयोरात्मनोर्मध्ये आत्मारथस्वामिनः कल्पितस्तस्यपरोक्षत्वेन चनस्वाभाविक
मित्याह॥ आसेद्रियमनोयुक्तमिति॥ औपाधिकंसप्तृत्वेन्वयव्यतिरेकाभ्यांस्त्रे चप्रमाणंदर्श
ह॥ नहिकेवलस्येति॥ वेष्णवंपदप्राप्तिश्रुत्यनुपपत्त्याविनस्वाभाविकंसप्तृत्ववाच्यंइत्याह॥
एवंचसतीति॥ प्रत्यात्मंसप्तृताश्रुतिप्रत्यगनुयायिस्वरूपंसप्तृतेत्यर्थः नन्वर्थसिद्धोमनसआ
त्मपर्यंतावयवव्यापकमनोयायिस्वरूपंचप्रसिद्धंयथाघटादेर्मृदादिकंचहपरंतत्सू न
क्ष्मंपरस्परंकार्यकारणभावेमानमस्तीत्यंतथापिविषयेंद्रियव्यवहारस्यमनोधी
नतादर्शनान्मनसश्चावश्यापेक्षत्वेकल्पते॥ तच्चपरमार्थतएवात्मसप्तृतामितिकेषांचिद्भ्रम
स्तन्निरासायोक्तंमनःप्रदूष्यव्यक्तसूक्ष्मामिति॥ अत्रमध्येहिसोम्यमनइतिश्रुतेर्मनोरूपा
वगमादन्नभावाभावाभ्यामुपचयापचयदर्शनाद्भौतिकमेवतत्तस्यचसेकल्पादिल
क्षणस्याध्यवसायनियम्यत्वाद्बुद्धिंपरापवतिबुद्ध्यात्मेतिकेषांचिद्भिमानस्तदपन
यार्थमाह॥ बुद्धिप्रदूष्यवाच्यामिति॥ करणत्वादिंद्रियवद्बुद्धेर्भौतिकत्वंसिद्धंकरणत्वंचस्वयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्याहमुपलभ्यतिअनुभवा।सिद्धं ततोऽस्तावयवसंस्थाने षेवार्थादिष्वन्तरेपरत्वं कल्प्यतेपरम
कृषार्थेदर्शनेषयान स्वर्थादीनांपरत्वप्रतिपादयिषितं प्रयोजनमपावादाद्वाक्यभेदप्रसंगाच्चे
तिसुरनरतिर्यगादिवृद्धिनांविचारकृत्वासातत्यगमनाद्।तेनोच्यतेसूत्रसंस्थानं हेरण्य
गर्भतत्वमित्यर्थः।।बोधा० बोधात्मकमितिज्ञानक्रियात्मकमित्यर्थः।।अथवाऽधिकारि
पुरुषाद्यपिप्रायेणबोधात्मकमव्यक्तस्याद्यःपरिणामउपाधिपरिच्छेदीकृतमहत्तत्वात्मकस्तेनरूपे
णबोधात्मकत्वंहिरण्यगर्भस्येत्यर्थः।।प्रलयेसर्वकार्यकरणशक्तीनामवस्थानमात्मरूपा
तंशब्दार्थसंबंधनाल्लिंगस्यनित्यत्वनिर्वाहायतासांचशक्तीनांसमाहारोमायातत्त्वमव्य
क्तंत्रिगुणलक्षणंसंगात्तादितिशक्तिसमाहारकृपमव्यमित्यर्थः।।तदेवंतर्ह्यव्याकृतमास्तांदेतस्मिं
स्तुरवलवस्वरूपागम्यंकाशाऽऽतस्यप्राप्तस्यमायातुप्रकृतिंनिष्पन्नमाश्रित्यनंतुमहेश्वरमित्या
दिश्रुतिप्रसिद्धंचाव्यक्तं।।तस्यसंख्याभिमतप्रधानाद्वैलक्षण्यमाह।।परमात्मनीति।।शक्ति
त्वेनाद्वितीयत्वाविरोधित्वमाह।।वटबीजेवेति।।यथाविवटबीजेवटस्यशक्तिरूपेणवृक्षाद्भिन्नं बीजं
स्वरूपेणतुनद्वितीयंकथ्यतेतद्वदव्यक्तेनमायाशक्त्याद्वितीयं।।सत्त्वादिरूपेणनिरूप्य
माणेव्यक्तिरस्यनास्तीत्युक्तंव्यक्तं।ततोव्यक्तशब्दाद्रूपाद्विरोधित्वंद्रष्टव्यं।।सर्वस्यप्रप
ञ्चस्यकारणमव्यक्तंतस्यपरमात्मपरतंत्रत्वात्परमात्मैवउपचारेणत्वमुच्यतेनत्वव्यक्त
वद्विकारितयाऽसौदित्वाव्यक्तस्यपरतंत्रंचपृथक्सत्त्वेप्रमाणाभावादात्मसत्तयैवसत्ता
वदर्शनादित्याह।।दर्शनेति।।दर्शनश्रवणादीनिकर्माण्यस्येतितथोक्तः।जीवस्यस्वप्र
काशत्वेब्रह्मात्मत्वेसत्यपियोयंब्रह्मचरूपानवभासःसर्वेनापिप्रतिबंधेनरूपेतिकल्प्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेतत्र प्रतिबंधकेन वरतु॥ सार्वज्ञ्यमुक्तिरपि वा बाधप्रसंगात्तनो ऽविद्येव प्रतिबंधकेत्याह॥ अविद्यामा
यावधिं ब्रह्मेति॥ निदिध्यासनेन प्रचयेनैकाग्र्यमापन्नमंतःकरणंयदासहकारिसंपद्यतेतदात
सतः कृतान्महावाक्यादहं ब्रह्मास्मीति यादृग्बुद्धिवृत्तिः, सैवतत्तस्यामाध्यस्कं ब्रह्मभावइतिस्व
तोपरोक्षं सतीयाव्यवच्छिद्यतइतिद्रव्यत्वमुपचर्यते॥ योहियन्मुक्तव्यवहारः सतद्द्रव्यंनिष्प्र
सिद्धं॥ क्रमेणैवं विषयदोषदर्शनेनाभ्यासेनचबाह्यं करणात्करणव्यापारं प्रविलापयेत्ति
प्रविलापनकर्तुः कःपुरुषार्थः सिध्यतीत्याशंक्याह॥ एवं पुरुषइत्यादिना॥ यावद्यावद्गुणंचय
स्तावन्नावतारतम्येनसेत्स्यद्दृष्टेष्वादिषुपरमात्मनिगुणानामत्यंताभावोऽतिशय
सेत्स्यसिध्यतीत्याह॥ स्थूलतावदित्यादिना॥ ७॥ ॥इतितृतीयावल्ली॥ ७॥ अनादिरवि
द्याप्रतिबंधः प्रागुक्तोयुक्त्यागुरुकप्रतिबंधदर्शनायोत्तरवल्ल्यारंभप्रतिसंबंधमाह॥ एषसर्वे
श्वित्यादिना॥ यदिहियएवंतत्सर्वानिस्युस्तान्यात्मनिष्ठतया ऽमृतत्वमीयुरतइंद्रियाणिबहिर्मु
खानिसृष्टानीतियत्तेषांहननमेवरतमित्यर्थः॥ अपश्यात्मावितिधात्वर्थानुसारेणव्यापक
आत्मशब्दार्थः यच्चस्मादात्तेसंहरतिस्वात्मन्येवसर्वमितिजगदुपादानंलक्ष्यतेविषया
नतीत्यतमिति श्रुत्यास्वचैतन्यात्मासंनोपलब्धृत्वमात्मशब्दार्थः॥ येनकारणेनास्यात्मनः
संततोनिरंतरोभावः काल्पितस्याधिष्ठानसत्तामंतरेणसत्त्वाभावात्यथारज्ज्वामध्यस्तोस
र्पःरज्वासातस्यतथाकल्पितंसर्वं येनस्यात्पदवत्सआत्मेत्यर्थः॥ कथंतदधिगम्यइतिचेदुक
त्वाद्ब्रह्मवत्सरोक्षत्वेन किंघटादिवत्सिद्धत्वादपरोक्षत्वेनाधिगम्यरोक्षत्वाकांक्षायामात्मत्वो

किंवे २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वलक्षणो ऽपरोक्षत्वेनैवाबाधः सम्यगबाधमित्युच्यते॥ येनेत्यादिना॥ म[illegible]नांव्यतिरिक्तेनाप्रसिद्धेनात्म
नो देहादेर्वप्यत्वं यद्यपि नप्रसिद्धं तथापि विचारकाणां व्यतिरिक्तेनैव वेद्यत्वं प्रसिद्धं तत्तायद्धेन
नासिद्धवत्यरामर्शेन विरुध्यत इतिपरीहरति॥ नन्वेवं देहादीत्यादिना॥ दृष्टिकाः शास्त्रादयोऽन
स्वात्मानमन्यं च विजानीयुः शास्त्रादित्वादृष्टत्वाच्च बालवद्दृष्टेऽबाधकमाह॥ यदहीति॥
यः कश्चित्पुर्वतपसो जातेऽपत्पतिसप्रकृतब्रह्मवपरपतीतिसंबंधः अ[illegible]पूर्वमित्या
दिहिरण्यगर्भस्यविशेषणमतःकरणेनजीववच्छरीरा[illegible]जीवतादात्म्यविवक्षयाविशेषणं॥
शास्त्रादीनुपलभमान[illegible]मिति॥ यदितियस्माद्धेकसुवर्णं जातंकुण्डलसुवर्णमेवमितितद्वद्ध
णोजातोहिरण्यगर्भोपिब्रह्मात्मकएवेत्यर्थः॥ हिरण्यगर्भस्येवविशेषणान्तरमाह॥ किं
चेति॥ सर्वात्मकंब्रह्मेत्तदसदुपाधेरवच्छिन्नचैतन्यस्य जीवस्यसंसारिब्रह्मणोऽस
त्वारिक्षाद्विरुद्धधर्माक्रान्तयोर्ययोगादित्याक्ष्यविरुद्धमत्वस्योपाधिनिबंधनत्वा
त्स्वभावेनकिंचिदनुपपन्नमित्याह॥ यद्ब्रह्मादिष्टित्यादिना॥ अमुष्यजगत्कारण
त्वोपाधेरुपाधिस्वभावमनादृष्ट्यज्ञानादृष्ट्याकारणतयालक्ष्यतइत्युपाधिस्वभाव
वेदृष्टिलक्षणानक्षतःकारणाप्युपाधेर्दृष्ट्यानिर्वाच्याविद्यामंतरेणसंभ
वःकार्यकारणभावस्यसंबंधस्यच [illegible] दर्शनरूपत्वान्नेत्युपमार्थंश्रुति
शब्दःयथाम्रवृक्षेनानात्वेपिनानात्वमध्यारोप्यसत्यत्वाभिनिवेशेनव्यवहरतितथा
जागरितेपिनानात्वमध्यारोप्यसत्यत्वाभिनिवेशेनव्यवहरतितस्यनिंदितत्वादकरस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मैवास्मीति प्रतिपत्तव्यमित्यर्थः॥ एवंरूपं चेद्ब्रह्म कथं सात्मेयविभागइत्याशंक्याज्ञं प्रति
कल्पितभेदेनेत्याह॥ अगोकत्वविशानादिति॥ अंगुष्ठपरिमाणं जीवमनूद्य ब्रह्मभावविधौ
नाद्रियमानविरोधादंगुष्ठमात्रस्थायिवस्तितत्वा द्ब्रह्मपरमेववाक्यमित्याह॥ पुनरुपित
देवेति॥ ७ ॥इतिचतुर्थवल्ली॥ ७ ॥यौनरूप्यपरिहरन्संबंधमाह॥ पुनर्पीति॥ सूर्योपि
तथंवक्तव्यमितिन्यायेनोपायांतरेणब्रह्मसाध्यतेतत्रोपायारूपमिश्रत्वेनोपेयस्यपिदोक्तीति
पुरेणसंहरत्वस्यामिनःपुरोपचयापचयाभ्यामुपचयापचयरहित्यंतत्सम्बन्धप्रतीतिमतःकृत्वा
सत्ताप्रतीतिमत्त्वंचात्तेत्यंभायशेप्रसिद्धावेदिःपृथिव्याद्देःपरोतःपरःस्वाराडुतिवेद्याःपृ
थिवीस्थस्यावत्वकीर्तनात्पृथिवीवेदिशब्दवाच्यापावतीत्यर्थः॥ असोवाआदित्योहंसःशुचि
षदितिब्राह्मणेनादित्यमंत्रार्थतयाव्याख्यातःकथंतद्दृढमिदंव्याख्यानमित्याशंक्या
ह॥ यदाप्यादित्यएवेति॥ सर्वआत्माजगतस्तस्थुषश्चेतिमंत्रान्मेऽउपलक्षितस्यचि
दंशोरिष्यतएवसर्वात्मत्वमित्यर्थः॥ येयंप्रेतेविचिकित्सामनुष्येइतियापूर्वंविचिकित्सा प्रश्न
मूलत्वेनोद्भाविताऽपिनिर्मूलेत्येतद्दर्शयितुं देहव्यतिक्रांतमस्तित्वंसाध्यति॥ आत्मनस्तु
पाधिमद्रूपादिना॥ सर्वेप्राणाःकरणव्यापारास्तेतंनार्थास्तमयंतुंस्वरूपंविलुमर्हंतिजउ
चेष्टात्वद्वचेष्टाऽवदित्यर्थः॥ शरीरंचेतनप्रेरितंतद्धिगमेभोगानर्हत्वाद्राजपुरवदित्याह॥
किंचास्येति॥ अन्यथासिद्धिंशंकते॥ स्यान्मतमिति॥ ननुजीवप्राणधारणइतिधातुस्मरण
छरीरस्यजीवनंनामप्राणधारणंप्राणसंयोगश्चप्राणधारणंकुंडदधिधारणवत्तत्र
चप्राणस्यैवहेतुत्वसंयोगाश्रयत्वात्कथंमुच्यतेजीवनहेतुत्वेप्राणेदोनानसंभवतीतितत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह॥ स्वार्थनाशसंहतेनेति॥ कादाचित्कस्य प्रणिश्शरीरसंयोगस्यस्वभावतोनुपपत्तेःसंघातस्यचलो
कैपरप्रयुक्तस्यैवचदर्शनादूचितव्यमन्येनसंघातप्रयोजकेनेत्यर्थःपरंप्रेतइतिप्रष्टुःपरलो
कास्तित्वेपिसदेहआसीद्विशेषतस्तन्निवृत्त्यर्थमुच्यतइत्याह॥ हंतेदानीमिति॥ जननमरण
कारणानांप्रतिनियमादयुगपत्सृष्टेस्मपुरुषबहुत्वंप्राप्तिइत्येतद्विषयेयाचेतिनाना
त्मनोव्यवस्थातइत्यनेनैतावतार्किकबुद्धिविरोधात्सैवपुरस्येत्येवोत्तरंयत्तन्नचित्तस्थैर्यसं
भवतीत्यांक्ष्योपाधिकपरदसाधनेसिद्धसाधनंस्यात्सैवपरदसाधनेचानेकांतिकत्वद
र्शयितुंप्रक्रमतइत्याह॥ अत्रैकेतार्किकेत्यादिना॥ प्रतिरूपउपाधिर्यस्यसतथोक्तस्तुल्यो
ऽन्यादृग्धर्मकोदृष्टांतस्तद्रूपोवाहेरपिलक्ष्यतइत्यर्थःपरमात्मादुर्विज्ञेयस्यादृश्यस्यिन्नत्वा
च्छ्रोत्रादित्याह॥ एकस्यसार्वात्म्यइति॥ अविद्यायांप्रतिबिंबितस्यिद्धानुभोपपत्तिर्नो
तस्यकामादिदोषप्रयुक्तःकर्मकुर्वतोनिमित्तंदुःखंस्वात्मन्यध्यस्यतिपरमात्मातुनिरवद्यत्वा
दुःसाधनशून्यत्वान्नदुःखितोनप्रयोजकेतरित्याह॥ लोकोल्लविष्यतीति॥ स्वरूपेणाश्रमा
विषयत्वेविपरीतबुद्ध्यध्यासबाह्यत्वरज्वादीनांतथाचैतन्यस्योपाधिस्थतारूपेणाध्या
सात्मत्वेपिनिरुपाधिकेबिंबकल्पत्वंस्वरूपेणाध्यासानाश्रयत्वान्नदुःखित्वप्राप्तिरित्यर्थः
पक्षेसंपदर्शनेपारतंत्र्यंचरचस्यनिहीनत्वंदुःखकारणंप्रसिद्धंतदभावान्नपरमात्मा
र्हीत्याह॥ किंचचिंत्यइति॥ सूर्यचंद्रमसोधातापेथापूर्वमकल्पयदित्यादिश्रुतेरन्यथा
मम कृताविघ्नानांप्रसंगपरिहारायकल्पांतरीयभावानांप्रतीतानांकल्पोत्तरसज्ञाती
यरूपेणासादःप्रतीयतेसतदास्योच्यविनाशिनांशक्तिदोषालयःस्यात्ततःप्रलयेवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्षुषस्सर्वं यत्र शक्तिरोधो विलीयते सोऽस्युपगंतव्यः दुरत्यर्थः बुद्धिमतामपि ब्रह्मेन्द्रादीनां परमाणे
या२ दाप्यमुख्यं हित्वौपहिर्मुखवाच्येनोपलप्यते सापि पंतोरगमयतीत्याह॥ चेतनश्चेतनानां
मिति॥ ब्रह्मादिशब्दवाच्यानां संघातानां वाचेतयितृत्वेन चैतन्यनिमित्तसाक्षी परज्ञाने
त्यर्थः॥ विमतं कर्मफलं तत्प्रकृत्याश्रितेन दीयमानं व्यवहितफलत्वात्सेवाफलवदि
त्याह॥ किंचसर्वज्ञसृष्टि॥ विदुदनुपवोपि परमाणुदे प्रमाणमाह॥ यत्तदात्मविज्ञानमुच्य
मिति॥ तस्मादस्संसारितत्तयानोजिहासितव्यं परमात्मपैदर्शनंकिंतु श्रद्धानतयाचिंचा
रयितव्यमेवत्याह॥ कथंन्विति॥ ७ ॥ इतिपंचमावल्ली॥ ७ ॥ शालमल्यादिन्
लदर्शनेनादृष्टमपिवृक्षमूलंयथास्तीत्यवधार्यतेतद्वदृष्टस्यापिब्रह्मलोकावधारणा
यप्रक्रमतउच्यते॥ तूलावधारणेनेति॥ वृक्षत्वेप्रवृत्तिनिमित्तमाह॥ वृक्ष्यादिति॥ ओव्र
श्चूछेदनेअस्यधातोःसप्रत्ययांतस्यरूपंवृक्षइतिछेद्यत्वेयुक्तिमाह॥ जन्मजरेत्यादिना॥ प्रसि
द्धवृक्षसाम्याद्वावृक्षशब्दप्रयोगइत्यभिप्रेत्याह॥ अवसानेचेत्यादिना॥ प्रसिद्धोवृक्षः
स्थाणुर्वापुरुषोवेतिविकल्पस्यदोषत्वेनाभ्युपगमेपि संघातायापरिहारोवार्थो वास मो
ने२ द्वाक्षद्वाइत्यादीनामेकेषांश्रुतसंख्याकुपारंतुबुद्धिविकल्पानांविषयइत्यर्थः॥ किंतं
साकोयंवृक्षइत्यनध्यवसायगोचरःकश्चिद्वृक्षोदृष्टस्तथायमपीतिसाम्येनसाम्योत्तर
माह॥ तत्त्वज्ञैस्सुधीरिति॥ अपरस्यब्रह्मलोकविज्ञानक्रियाशक्तिकामकोहिरण्या
दूया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[नि ६] ७

र्मः प्रथमोवरुणाय दो यूरोस्येति तथोक्तः बुद्धीद्रियाणां विषयाः शब्दादयः प्रवालपुराः किस
लयान्यस्येति तथोक्तः सुखादीनिफलानिपत्राण्यस्येति सुखदुखे प्राणिवेदनेरा यौने
कारसोस्येतिफलन्तेषेणवसलिलावसवस्तेन प्रकाशानिकर्मवासनादीनिसालिकादिभ्या
वेन जडीकृतानिमिश्रीकृतानिदृढबद्धानिअवांतरमूलानियस्यवट दृक्षस्येवसत
थोक्तः सत्यमोनोदिषुसप्तलोकेषुब्रह्मलोकादिनिरूपितान्येवपादिरणंतेः कृतसमुलीकृतो
महारोवायस्मिंस्तिविग्रहः।। कर्यस्यसन्यतापर्यंतेनष्टस्यासत्वपूर्वकमेवजन्मत
तोनास्तिमूलमितिरोकते।। याहुज्ञानादिति।। ननुसतोविषर्णादेरसतः सतःसमुत्प
त्यदर्शनात्सत्पूर्वकत्वप्राप्तेरुक्तासिसद्रूपंवस्तुजगतोमूलंतत्रप्रमाणपदलक्ष्य
प्राणप्रेरितरपिहेतुत्वादित्यर्थःसूर्यादीनांनियतप्रवृत्त्यनुपपत्त्यानियामकत्वेन
संभावितंयत्पारमेश्वरंरूपंतदवगमायेवयतःकर्तव्यइत्याह।।तत्रेहेतिहे
हैवबोद्धुंशक्तोःसन्निहैवचेज्जानातितदामुच्यतएवेतिसंबंधःइंद्रियेभ्यःपरात्मथाः
इतिपूर्वमुक्तंमिथ्यार्थानामग्रहणात्सर्वेप्रत्यगात्मत्वंनसंभवतीत्याशंक्याह।। ७ मि
अर्थानामितीति।। बुद्धिसुखदुखादिःसाम्प्रयोगुणस्त्वद्रूपवदितिवैशेषिकानुमाते
तदसत्सामान्यपत्वमात्रसाधनेसिद्धसाधनत्वान्मनसएवकामादिगुणत्वसमवायादा
त्मासत्वकल्पनेचनिर्गुणत्वशास्त्रविरोधादात्मनासहबुध्यादेरविनाभावाग
हणात्रबुध्यादेरात्मलिंगमित्याह।। लिंग्यतेगम्यतेयेनेति।। कथंदर्शनमुपपद्यत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिप्रश्नः कोऽपि प्रायः किंविषयतयादर्शनं वक्तव्यं उताविषयतयेव दर्शनोपायो वाच्यः* प्रथमंप्रत्याह॥ नसंदृश्इति॥ रूपादिमत्त्वद्दिशेषणंच दर्शनविषययोग्यमवातिद्
भावादित्यर्थः॥ द्वितीयंप्रत्याह॥ कथंतर्हीति॥ बालकरणतामोपरमापियरामनो
विषयानिरकल्पयेत्तेतदामुमुक्षो बुद्धिस्तस्यनियन्त्रीभवतिहेमनंकिमर्थंमुपिनाच
वप्रधावसिन्नतावत्यप्रयोजनत्वंतवजडत्वात्प्रयोजनसंबंधानुपपत्तेःविष
याणांचाक्षाणिष्णुत्वादिदोषदुष्टानांसंबंधेनप्रयोजनानुपपतेनापिचेतना
र्थंतस्यासंगतत्वात्परमानंदस्यभावत्वाश्रेतिनियंतृत्वंबुद्धिमेनीदृच्यंतदृत्याहाम नेऊ
नस्यइति॥ अविकल्पयित्र्येतिविषयकल्पनाशून्यया ब्रह्मास्मीत्यपिपदोवब्रह्मात्मा वतर
वव्यंजिकयामहावाक्योद्भवयाबुद्धिरत्यात्मासातुराक्यतइतिसंबंधः कथंभूतेत्या
हेत्यतआह॥ मनसेति॥ यथमयादृश्यतेबालधटादित्तत्तदहंयथानभवामित
धास्मिंजपिसंभवते॥ यथदृश्यतेतत्तदहंनभवामिकियोत्रसांराःसोस्मिसर्वज्ञा
तिरेष्वेवलक्षणलक्षितत्वादेवेतिविचारेणप्रथमंसंभावितइत्यर्थः श्रुतवेदा
तानामपिकेषांचिद्ब्रह्मास्मीतिबुद्धिरुदेत्यदर्शनादारब्धप्रतिबंधकांतरंतदपनयायोपा
योप्यन्यवक्तव्यइत्यभिप्रेत्याह॥ साहृदितिः श्रवणमननाभ्यांप्रमाणप्रमेयास
म्भवनानिरासेकचित्तस्यानेकजन्महेतादोषाःप्रतिबंधकाःसंभवंतितदपनयायो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्णश्लाघ्यो त्यारब्धो योजयेदारब्धो नियुविक्तेषयेषु निक्षिप्तंस्यात्तद्दोषदर्शनेनतत्रो विघ्नावर्तये श्लोक ४ दी०

गो नुष्ठत्व व्य उपदिश्यत इत्यर्थः॥ यदनुगतानीति येनमनसाअधिष्ठितानि तेन
सहावर्तिष्यंतेनिवृत्त व्यापारा णिभवंतीत्यर्थः॥ वियोगमेवसतंयोगमिति चित्रफलक
एयाम न्यंतइत्युक्तंतत्स्फुटयति॥ सर्वानर्थेति॥ उपसंहृतेमनोयदिसुषुप्तिंगछेत्तदा
सा नर्थबीजावरुद्धासंवर्तितुआरब्धेयेच्छावृत्तमपितत्तटस्थंचेत्स्यात्साप्यि
वरुद्धेयावत्स्यात्तोनिरुद्धंमनोयदाजागर्तिनस्वपितिनचोत्तरोल्लासस्यंभवति
पूर्णश्लाघ्यासत्तयेवसीयांभवतितदासर्वानर्थवियोगात्सएषसावरुद्धासंवृती
त्यर्थः योगारंभकाले प्रमादवर्जनंविधेयतया व्याख्यानुवादपरतया व्याचष्ठे वा र
उपयच्छतीति॥ विधिपक्षेहेतुं पृच्छति॥ कुतइति॥ उत्तरमंत्रमवतारयितुं शंकामु
द्भावयति॥ बुध्यादिचेष्टाविषयचेति॥ घटोस्तीतिप्रतिपन्नस्यघटस्यमृ
दाद्यात्मनाद्रव्यलोपनेघटकारणविलीयतेनास्तित्वंशरावस्यकपालाद्यवयवानुवृत्तिदर्शी
नादतः कार्यविलापनस्यास्तित्वविघ्नत्वान्नशून्यतापर्यवसायीविलयेइत्युक्तमेवतत्स्फु
टयति॥ तत्रहीति॥ स्थूलस्यकार्यस्यविषयसंस्कारामवत्रिष्यतेतदयापिविपरि
येतत: सूक्ष्मामितियावद्दृष्टेनयाप्युपलभ्यमत्रनदृश्यतेतत्रापिमुक्तविलयस्याव
श्यंभावित्वात्सन्मात्रमेवामृतमवतिष्ठतइतिकार्यमे [redacted] वसो
स्मृतारतम्यपारंपर्येणतुश्रीयमाणंस्वहृदिनिरुद्धपुरुषस्यागमयतीत्यर्थः॥ननुयद्दृश्यंत ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुसच्यथास्वप्नदर्शनमितिव्याप्तिरसतोनास्तित्वेनदृश्यस्यसर्वस्यासत्वात्सद्बुद्धिरपिनास्ये
वेत्याशङ्क्याह।। यदापीति।। सद्बुद्धिरपिनास्तीत्येवंरूपः प्रत्ययोवस्तुमस्तीत्यनुपगंत
व व्यमन्यथानिषेधव्यर्थतायेगौदृष्टांततोगत्वासद्बुद्धिःस्वीकृतास्यादित्यर्थः ततकिमि
त्यतआह।। बुद्धिर्हीति।। व्यभिचारिष्वपिचित्तेषु सन्मात्रबुद्धेरव्यभिचारदर्शना
द्बुद्धेश्चस्वतःप्रामाण्यात्सन्मात्रंवस्त्वभ्युपगंतव्यमित्यर्थः।। इदमस्यसदेवमूलंजगतो
वाच्यमित्याहुः।। मूलंचेदिति।। नास्तिजगतोमूलंब्रह्मेत्येवंगमेपिप्रतियोगितया
ब्रह्मज्ञानसंपन्नवाक्यमितिमुमुक्षुणाब्रह्मज्ञानकामेनास्तीत्येवापलप्तव्यमित्याह।।
कस्मादितिः। प्रतियोगितयाज्ञानस्यनिषेध्यत्वादात्मतयाज्ञानस्यादतोब्रह्मज्ञान
कामेनास्तिजगन्मूलमित्यवगंतव्यमेवेत्याह।। अस्तीतिब्रुवतइत्यादिना।। सोपाधि
कस्यात्मनोज्ञानान्मुक्त्यसंभवान्निरुपाधिकज्ञानायापिप्रयतितव्यमित्याह।। यदा
वितिः। सोपाधिर्यः प्रथमंस्थिरीकृतस्यतद्द्वारेणलक्षणादोवगमेसतिक्रमेणवा
क्यार्थावगतिः संपाद्यतइत्याह।। तत्रापुण्यइत्यादिना।। सदुपलभ्यमानंका
र्यमुपाधिर्यस्यकारणत्वस्यतत्रतोयस्तित्वप्रत्ययःकारणत्वादस्तीपरस्मै तितेनोप आ
लब्धस्यतियोजनासर्वकामाइतिप्रवृत्तफलकर्मोपरक्तापितद्वारीरस्थितिनिमित्तेन
पानादौप्रवृत्तिकारणेच्छाव्यतिरिक्ताःसर्वेकामाःकाम्येनज्योतिष्टोमादिनास्वर्गा
स्यामित्रेणपुरोडाशेनजनंवशीकरिष्यामीत्येवमादयःस्वर्गादिदेहेष्वप्यहमेवति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षामित्युद्योगाश्च प्राप्ता एव प्राप्तविषयस्य कामोव्यर्थोमिथ्यार्थस्यासावितिविचारेणाविनीर्यं
तइत्यर्थः॥ कामाश्रय आत्मेतिचेदाश्रयिकमतंश्रुतिबाध्यत्वान्नादरणीयमेवेत्याह॥ बुद्धिहीं
१३ ति॥ कामप्रविलयस्यसुषुप्तौसंवादमुक्त्वाचिन्हत्वंसंभवतीतिमत्वाह॥ कदापुनरिति॥
प्रकरणविच्छेदेनोत्तरत्रसंबंधदर्शयति॥ निरस्तादोषेत्यादिना॥ यदप्राणेत्यस्करणप्र
करणाद्ब्रह्मविद्विषयेवेयंगतिरितितदसदुक्तिरश्रवणनलिंगेनपरिछिन्नेगमनयोरयं
स्यागतेःसंबंधावगमेसतिदुर्बलेनश्रुतेरप्रकृतब्रह्मवित्संबंधानुपपत्तेश्चेत्यं
राणामपितत्संबंधप्रसंगाच्छ्रुतिविरोधप्रसंगाच्चविस्तरश्चप्रकटार्थोद्रष्टव्यः आत्मान
देहमधिकृत्यवर्त्मतदुत्क्रांतिंप्रत्यक्स्वरूपमेवब्रह्मप्राप्यविमुक्तुर्भवतिनान्यद्रूप
मर्चिरादिगम्यंप्राप्यस्वयोगस्यवियोगावसानत्वादित्यर्थः एवंशारीरस्यविच्छेदेनसहसं
बंध्यःएवंविदिति॥ ८४॥ ॥इतिश्रीमच्छांकरस्यकाठकोपनिषद्भाष्यस्यटिप्प
णंसमाप्तं॥ ॥श्रीसीतारामार्पणं॥ ८४॥ ॥ॐनमोभगवतेश्रीवासुदे
वायसर्वबुद्धिसाक्षिणे॥ ॥

KKSU LIBRARY
RAMTEK
441 106
mj054
Dist. Nagpur
15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.10.20 12:10
,TRANSFERRED=2020/10/05 at 12:12:32
,PAGES=15
,TYPE=STD
,NAME=S0003848
,Book Name=M-1054-KUTHO PANIBHASHYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection